अष्टनो॥ दीर्घग्रहणमिति। अष्टन आ विभक्ताविति नित्यत्वादात्वविधेर्व्यभिचाराभावाद्विकल्पेपि चात्वस्यं दृस्वान्तास्तत्वात्षट्स्वरेण भाव्यमिति प्रश्नः। अष्टस्विति। अस्मादेव दीर्घग्रहणादात्वविकल्पितमिति भावः। अष्टनो दीर्घग्रहणमिति। त्यापसिद्धस्यैवार्थस्य दीर्घग्रहणं लिंगमात्वस्य बहिरंगत्वात् तंगणापास् संज्ञायां कर्तव्यायामसिद्धत्वान्नान्तत्वादेव षट्संज्ञायाः सिद्धत्वात्। एतदेवेति दीर्घग्रहणेनान्यथानुपपत्त्या यमर्थोत्ता

अष्टनो दीर्घात्। दीर्घादिति किमर्थं अष्टसु प्रक्रमेषु ब्राह्मणा आरधीतादीर्घादिति शक्यमकर्तुं कस्मान्न भवति अष्टसु प्रक्रमेषु ब्राह्मणा आरधीतेति। षट्स्वरो ऽत्र बाधको भविष्यति। नाप्राप्ते षट्स्वरे अष्टनः स्वर आरभ्यते स पथैव दीर्घान्तं बाधते एवं ह्रस्वान्तमपि बाधेत। न दीर्घान्ते षट्स्वरः प्राप्नोति किं कारणं आत्वे कृते षट्संज्ञाभावात्। अन उत्तरं पठति। अष्टनो दीर्घग्रहणं षट्संज्ञाज्ञापकमाकारान्तस्यानुदर्थं। अष्टनो दीर्घग्रहणं क्रियते ज्ञापकार्थं किं ज्ञाप्यमेतज्ज्ञापयत्याचार्यः भवत्यात्वे कृते षट्संज्ञेति। किमेतस्य ज्ञापने प्रयोजनं आकारान्तस्यानुदर्थं आकारान्तस्यानुट् सिद्धो भवति। अष्टानामिति न तु बनिस्यमात्वमेतदेव ज्ञापयति विभाषा आत्वमिति परं यदीर्घग्रहणं करोति तरथा हि अष्टनः स्वे बद्रूयात्। धातुस्तुमो। न घञाघुदात्तत्वेद्द हन्महतोरुपसंख्यानं। न घञाघुदात्तत्वेद्द हन्महतोरुपसंख्यानं

प्यते। धातु। द्दहन्महतोरिति। धातु वज्ञावादेव सिद्धत्वान्नियमार्थमेतत्पूर्वपरादिभ्यो माभूदित्येवमर्थं। पितुगोरादिषु द्दहत इति पठंति नैषामनर्थकोऽसौ पाठो नुपसर्जनाधिकाराद्व्यातिद्दहत्सन्तिमहतीति गोरादिड्डीष्नास्तीति डीवेवो गिच्छसणः कर्तव्यस्तस्यानेनोदात्तत्वं नत्वत्रतरं न विध्यमावान्न प्राप्नोति नेतरस्ति। तदनेनापि द्दहन्स्थापरे

अष्टनो दीर्घात्। दीर्घात् इति सप्तम्यर्थे॥ ... न पदा दीर्घमन्नः ॥

भा॰कै॰६ उदात्ताउदात्तयणीति। उदात्तपणात्सपत्नीयोदात्तहल्लानिवक्रमत्वमित्यर्थः॥वाक्पत्नीतितत्पुरुषोनभस्वान्किंदिधि
७८ षितिपूर्वपदप्रकृतिस्वरात्वेधात्वमासंतोदात्तत्वविभाषापूर्वस्येतिनकाणदेशः॥हलपूर्वग्रहणानर्थक्यमि
ति।पथ्योणणपरस्वनेनाणानणासमुदायस्यैवोधानकिंस्यादीरपरत्वेनभवस्यैवमप्रपद्यस्यादोपणापरास्य
दायउदात्तस्यस्थानेविधीयतेनपणाविकेवलस्यतिस्वरानिपवन्निष्पन्नस्यर्थः॥स्वरितत्वेचेति।उदात्तस्वरितयोर्यणा
स्वरितोनुदात्तस्येत्यत्रसमुदायादेशस्याप्यपरीस्वाम्नयस्यादीस्वरितत्वनिश्चयर्थेहलपूर्वग्रहणान्कृतमित्यर्थः॥

उदात्तपणोहलपूर्वादितिकिमर्थोऽयम्रयेवाचेवोउदात्तपणिाहलग्रहणंनकाणंतार्थः।उदात्तपणिाह
लग्रहणांकर्तव्यंकिंप्रयोजनंनकाणंतार्थंनकाणंत्यादिपियथास्यात्वाक्पत्नी।चिसली।हलपूर्वग्रह
णानर्थक्यंचसमुदायादेशत्वात।हलपूर्वग्रहणानर्थकंकिंकारणंसमुदायादेशत्वात।समुदायो
ऽादेशः।स्वरितत्वेचावचनात्स्वरितत्वेचहलपूर्वग्रहस्यावचनात्तमन्यामहेहलपूर्वग्रहणमनर्थक
मिति।पन्नावदुच्यते।उदात्तस्यणिाहलग्रहणंनकाणंतार्थमिति॥क्रियतेन्यासएव।छिलकास्कोनिर्देशः
।उदात्तयणोहलपूर्वादोःधात्वादिति।पदस्पुच्यतेहलपूर्वग्रहणेनर्थकंचसमुदायादेशत्वादिति।अथ
मस्तिकेवलआदेशःबुद्धतितबावद्धतितवरति॥
स्वरितत्वेचेति।उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येत्यत्रसमुदायादेशस्याप्यपणादेवाम्नयस्यादोस्वरितत्वनि
श्चयर्थेहलपूर्वग्रहणंनकृतमित्यर्थः॥छिलकाकःकपति।तत्रेकामकारोलुप्तपंचमीकोनिर्दिष्टः।तस्मादात्तग्रहणेनवि
शेषणेउदात्तनकारात्परस्यानधातुदात्तत्वेभवति।नप्यकारेणाभक्तत्वनिषायस्तत्रकाम्प्रतिदर्शितोनेत्वियंस राम॰
ष्णातिःबद्धतितवति।वहूमितितदन्वस्योदात्तिवद्धत्राहिःवहोर्नत्वदुत्तरपदभस्यास्यितिदेशादतोदात्तत्वमत्रवि ७८

ह्रस्वनु॥आरेवानिति।रयिरस्यास्तीतिमतुप।रयेर्मतौवहुलमितिसंप्रसारणंपूर्वैकादेशआकुणात्तनोह्रस्वाभावान्मतुप्
स्वरोनप्राप्नोतीतिवचनं।त्रिवतीरिति।छदरसीरइतिचलं।वाछंदसीतिपूर्वसवर्णोदीर्घः।नामं।मतोह्रस्वांतादिति।मतुपिह्र

ह्रस्वामतुपुदात्तत्वेरेग्रहणं।मतुवुदात्तत्वेरिग्रहणंकर्तव्यं॥आरेवानितुनोविशः।त्रिप्रतिषेधश्चवक्तव्यः
।त्रिवतीर्याज्यानुवाक्याभवंति।नामन्यतरस्याम्।इहकस्मान्नभवतिकिंशोरीणां।कुमारीणां।ह्रस्वादि
तिवर्तते।रहापितर्हिप्राप्नोति।अग्नीनां।वायूनां।किंकारणंदीर्घत्वेकृतेह्रस्वाभावात।इदमिहसंप्रधा
र्यदीर्घत्वंक्रियतांस्वरइतिकिमत्रकर्तव्यंपरत्वात्दीर्घत्वं।एवंतर्हिनामस्वरेमतोह्रस्वग्रहणं।नामस्व
रेमतोह्रस्वग्रहणंकर्तव्यं।मतोह्रस्वांतादिति।तत्रहिवक्तव्यंनवक्तव्यं।आहायंह्रस्वांतादिति।नचनामि
ह्रस्वांतोस्ति।तत्रभूतपूर्वगतिर्विज्ञास्यतेह्रस्वांतंभूतपूर्वमिति।सांप्रतिकाभावेभूतपूर्वगतिर्विज्ञायते
अयंचास्तिसांप्रतिकःतिसृणांचतसृणामिति॥ङ्याश्छंदसि

ङ्यांतपदषंतस्यास्वरोनामन्यतरस्यामुदात्तोभवतीत्यर्थः।भूतपूर्वगतिरिति।अकृतेदीर्घेह्रस्वांतास्वरोनामभवति
तिकृतेदीर्घेस्वरः प्रवर्त्तते॥ श्रीरामकृष्णगोविंदयनमः ॥ ॥ ॥ ॥ ॥

भा॰ कै॰ ६ षट्त्रिचतुर्भ्यो नामिति। विकल्पे प्राप्ते नित्यार्थो योगविभागः इति संप्रतिकाभावाद्भूतपूर्वगतिराश्रीयते नैकमुदाह
७६ रणमिति। ह्रस्वनुड्भ्यां मतुबित्यत्र ह्रस्वग्रहणस्य स्वरितत्वमिहार्थं प्रतिज्ञातं। तच्च सर्वह्रस्वसंग्रहार्थमिति विषय
संकोचेन युक्तः अन्यथा लाघवाय चान्यतरस्यान्नतरं नामिति ब्रूयादित्यर्थः। मतौ ह्रस्वादिति वर्त्तते इति। मतुप्ग्रह

णे तदस्ति। षट्त्रिचतुर्भ्यो हलादिरिति स्वरे नेनात्र भवितव्यं तस्मात् त्रिसे प्राप्ते इयं विभाषारभ्यते। एवं तर्हि योग
विभागः करिष्यते षट्त्रिचतुर्भ्यो नामुदात्तो भवति। ततो हलादिः हलादिश्च विभक्तिरुदात्ता भवति। ष
ट्त्रिचतुर्भ्य इति। इदं तर्हि लनराणां न पतेनायतेर्भुविः। ननु चात्रापि नचान्यतरस्यामित्येष स्वरोऽत्र बाधको
भविष्यति। न सिध्यति किं कारणं झलग्रहणं तत्रानुवर्त्तते किं पुनः कारणं झलग्रहणं तत्रानुवर्त्तते
किं! इह मा भूत् त्रा त्रे उदात्तयणो हल्पूर्वादित्येष स्वरो न बाधको भविष्यति। इदं तर्हि नौ नैरिति नैकमुदाह
रणं ह्रस्वग्रहणं प्रयोजयति यद्येतावत् प्रयोजनं स्यात् नामित्येव ब्रूयात्। तत्र वचनाद्भूतपूर्वगतिर्विज्ञा
स्यते। ह्रस्वान्तं यद्भूतपूर्वमिति। अथवा नैवं विज्ञायते नाम् ह्रस्वं रमनोर्ह्रस्वग्रहणं कर्त्तव्यमिति कथं तर्हि
नाम्स्वरे मतौ ह्रस्वादिति वर्त्तत इति॥

णमिहानुवृत्तं सामर्थ्यात् सप्तम्यन्तं संपद्यते। ततो मतौ बहुस्वान्तरङ्गं तस्मात् संपादे नामुदात्तो भवतीत्यर्थः संपद्यते॥ राम॰ ७६

न गोश्वन्साविति। एकप्रकरणोपादानादिति भावः। त्याभ्यामिति। सप्तमीबहुवचने तेक्षितिस्पवर्णान्तत्वाभावात्प्रतिषेधो न प्रा
प्नोति। विधिरप्यत्र नेति तेषितिसप्तमीबहुवचने परे कारान्तं रूपं न तस्माद्त्रपरात्तृतीयादिः। त्राभ्य इति। तास्विति सप्तमीव

न गोश्वन्साविति किमिदं प्रथमैकवचनस्य ग्रहणमाहोस्वित्सप्तमीबहुवचनस्य कुतः संदेहः समानो
निर्देशः पुरस्तादेव निर्णीतं सप्तमीबहुवचनस्य ग्रहणमिति। इहापि तेरेवम वितुमर्हतीय यदि सप्तमीबहु
वचनस्य ग्रहणं। ताभ्यां ब्राह्मणीभ्यां याभ्यां ब्राह्मणीभ्यामत्र न प्राप्नोति। विधिरप्यत्र न सिध्यति। किं का
रणं न स्येतद्भवति यत्तो भवति रूपं। इदं तर्हि तिभ्यो ब्राह्मणीभ्यो यिभ्यो ब्राह्मणीभ्यः। विधिश्च सिद्धो भवति
षेधस्तु न प्राप्नोति। अस्ति पुनः सप्तमीबहुवचनस्य ग्रहणे किंचिदिष्टं संगृहीतं भवति आहोस्विद्दोषा तमे
वास्तीत्याह। इह यान्भ्यो ब्राह्मणीभ्यः ताभ्यो ब्राह्मणीभ्य इति विधिश्च सिद्धो भवति प्रतिषेधश्च। अस्तु ता
र्हि प्रथमैकवचनस्य ग्रहणं। यदि प्रथमैकवचनस्य ग्रहणं तेनेति स्वरः पुंसि न सिध्यति। न चावश्यं पुंस्ये
व स्त्रियां पुंसि नपुंसके वा तेन ब्राह्मणेन तया ब्राह्मण्या तेन कुण्डेनेति॥

ह्रबहुवचने वर्णान्तत्वात् तेनेति। सा इति प्रथमैकवचने परे वर्णान्तं न तस्मात् परं तृतीयैकवचनं किं तर्हि रूपान्तरमुक्तम्
। तयेति। सेति प्रथमैकवचने परे वर्णान्तं न तस्मात् परा तृतीया न पुंसके वन्तादिति सा वर्णान्तमेव न भवति। तेनेन ब्राह्म
णकुण्डेनेति प्रतिषेधाप्रसंगः ॥ श्रीरामकृष्णः

भा॰कै॰६
८० सप्तमीवहुवचनस्यापीति। तेष्विति पुंनपुंसकयोस्तावदस्वर्णांतं न भवति। तास्विति स्त्रियां यद्यप्यवर्णांतं तत्थापि
तपे सुत्रे रूपो तरपुत्क्षास्यात्। ततीयेति प्रतिषेधो न प्राप्नोति। तस्मादिति। प्रथमे कश्चन स्पल्लिङ्ग्रहणमिति नि
र्णायस्ते नह स्स्वानि स्याहावपि मतुपरशान्तत्वप्रतिषेधो न स्यात्। तेनितियदुपन्यस्तं प्राप्तस्तत्र कृथं स्वरः। एकारांतप
देकाचुपोत स्मादत्रपरोन द्या। नचाङ्गुणो कृते प्राप्निर्निषेधाडुभयाश्रये। विधावनादिवन्नस्यादिस्तं तस्मादिरवुधो।
तिस्त्री ता। किरती ति। स्ना प्रसाधितः संज्ञाधर्मेणा संज्ञी कथ्यते रस्यास्ति तिद्धपदेशञ्चादेशस्य यथा चोपादतिप्र
सप्तमीवहुवचनस्यापि ग्रहणं प्राप्नोषः। तस्मादुभाभ्यामपि प्रतिषेधे यन्नरीप्सुग्रहणं कर्तव्यमिति।
नाणो प्सुनसावर्णीण ऋऋ ऌ ऋभ्यो यतदोभ्यति। नित्सु ति। तित प्रत्ययग्रहणातिति प्रत्ययग्रह
णं कर्तव्य। इहमाभूत। भीतरन्तो। किरति। गिरति। तन्नहिं वक्तव्यं लवक्तव्यं नैषतकारः कस्तर्हि रकारः
। यदि रकारोऽतस्मितो दीर्घः प्राप्नोति। भाष्यमानेन सवर्णानां ग्रहणं नित्ये वन भविष्यति। परिभाष्यमानेन
सवर्णानाग्रहणं नेत्युच्यते अरसोः सेरीडुरोमः अमस्यामित्यत्र न प्राप्नोति। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति
भवत्युकारेण भाष्यमानेन सवर्णानां ग्रहणमिति। यदयं दिवउदिति उकारांतं परं करोति। एवमप्येवं तर्हि
प्रत्ययग्रहणं कर्तव्यमत्रमाभूदिति॥ ॥
सप्तम्यत्संज्ञाहि प्रसाधक एवमवस्थितस्य प्रवर्तते। नोपविध्यानहारेणावतस्यासत्वं प्रसाध्येम प्रतिपाद्यते। तथा
वायमर्थीः ज्ञाताद्धातोर्यः प्रत्ययो भवति सचतित्कार्यं लभतइति। अनेक प्रयोजनरूपीनाद्धातुं वयानातकारस्त। राम॰
क्वालग्रहणार्थश्चस्यात् स्वरितार्थश्च। प्रत्ययाप्रत्यययोः प्रत्ययस्य प्रत्ययइति परिभाष्यकारवर्त्तिककारभ्यान ८०
क्रविराश्रिता। एवमप्येवंवेति। उकारार्थमित्यर्थः॥ श्रीरामकृष्णः ॥ ॥

कस्तर्हि रकार इति। रत्तं तत्र्यांवक्तव्येम्भावावसानइति वर्त्तस्य पूर्वत्रासिद्धमित्यसिद्धत्वान्नित्वाभावादत्वरितत्वाभावः। रकारे
पीति। नन्वेवं सति तपरस्तत्कालस्येत्यत्र पंचमीसमासस्याप्यग्रणादरोविव्यत्रोकारस्य रपरत्वाद्विस्त्रकालग्रहणप्रसंगः। एवं
तर्हि थकारस्य स्थाने जश्त्वं कृत्वा निर्देशः। अदोरविति करिष्यते। जोश्त्वस्य पूर्वत्रासिद्धमिति सिद्धत्वाद्दपरत्वाभावः। अन्यत्रा
पि भाष्येयदुक्तेनैषतकारः कस्तर्हि रकारइति तस्याथिथ स्य जश्त्वं नयो रकारः स विज्ञेयः तास्यत्तुरात्रोकथमिति। यदो

नैषतकारः कस्तर्हि रकारः। यदि रकोन ज्ञापकं भवति। एवं तर्हि तपरस्तत्कालस्येति। रकारोपि चर्त्वं भूतो नि
र्दिश्यते। यद्येवं चर्त्वस्यासिद्धत्वाद्धि विस्युत्वं प्राप्नोति। लोत्रा निर्देशः अथवा असंहितया निर्देशः करि
ष्यते अणुदित्सवर्णस्य चाप्रत्ययः तपरस्तत्कालस्येति। ता स्यातु॥ अदुपदेशादिति कथमिदं विज्ञायते
अकारोपदेशादिति। आहोस्विदकारान्तयदुपदेशादिति। किंचातः यदि विज्ञायते अकारोपदेशादिति
हतो हथस्त्रापि प्राप्नोति। अथ विज्ञायते अकारान्तयदुपदेशादिति नदोषो भवति नत्वाकारान्तपदुप
देशाद्यपि विज्ञायमाने त्रापि प्राप्नोति॥ ॥

परिशेषोकारेणविशेष्यते तदानंतरं विधिसद्भावादकारान्तउपदेशास्त्वर्थः सपद्यते। यदान्तपदेशेनाकारो विशेष्यते निपा
तन्याद्यविशेषणस्य पदनिपातः। नदाः कारउपदेशादस्वर्थः इति पक्षद्वयसंभवात्प्रश्नः। हन्तइति। हंतेरकारउपदेशो भवति
ततः परं सार्वधातुकमिति स्वरप्रसंगः। हंतिस्त्वकारान्तउपदेशेन भवतीत्यकारान्तउपदेशइति विज्ञायमानेन दोषः॥

न्या॰कै॰ ६ एतदपीति। अथ हकार एवारंतस्मात्कस्मान्नाश्रीयते। नैतदस्ति। समुदायपरत्वादुपदेशस्य नास्ति हकारस्याकारोपदेश
८१ त्वं तस्माद्धि हंतीति नकारांतो व्यवस्थितउपदेशे दकारस्तु कल्पितोऽकारान्तत्वेनेति नास्माद्धि हनस्त्यनेः। अर्थवतोऽपशब्दोपदेशा
न्न ह्यार्थस्यागोपादानात्मनां भेदं प्रतिपद्यते। यथा स्वायेस्ये एणधातुस्तन श्चैकत्रितिव्यपदिश्यते। अनर्थकस्य तु नेद
निर्बंधनाभावाच्च परे शिवह्राद्याभावः। माहि धुक्षातामिति। लोपे कृते का राउ पदेशास्य लासार्वधातुकेन भवतीति ना
स्यानुदात्तत्वाप्रसंगः। उपदेशे पुनः कारांतमित्यत्र तु पक्षे वस्तोपदेशः कारांतत्वात्कृते पि लोप एकदेशविकृतस्यान
न्यत्वात्तत उत्तरं लसार्वधातुकमितिस्वरप्रसंगः। तन्न तावदत्रेति। लसार्वधातुकस्य प्रत्ययाद्युदात्तत्वेन प्रवर्त्तनं दस्यर्थः
पतदपि हि यपदिशिवह्रादेनारांतमवस्तुपदेशो अर्थवतामपदेशिवद्भावः। यदि तर्हि कारांतं यदुपदेशोऽस्तीति विज्ञा
यते माहि धुक्षातां माहि धुक्षाथामत्रापि प्राप्नोति। अस्त्वनुदात्तत्वे कृते लोपः। उदात्तनिवृत्तिस्वरेण सिद्धं न सिमि
द्धमिति। एवमिह संप्रधार्यमनुदात्तत्वं क्रियतां लोप इति किमत्र कर्त्तव्यं परत्वाल्लोपः। एवं तर्हि इदमघत्लसार्व
धातुकानुदात्तत्वं प्रत्ययस्वरस्यापवादः। न चापवादविषय उत्सर्गोऽभिनिविशते पूर्वाद्युत्सर्गाः प्रकल्प्यापवाद
वादविषयं तत उत्सर्गोऽभिनिविशते। तत्रात्रानारूढ एव प्रत्ययस्वरो भवतिऽपवादविषयं लसार्वधातुका
नुदात्तत्वं प्रतीक्षते। तत्रानुदात्तत्वं क्रियतां लोप इति किमत्र कर्त्तव्यं परत्वाल्लोपः। यद्यपि परत्वाल्लोप सो
सावविद्यमानोदात्ते उदात्तो लुप्यते। तास्यादिभ्यो नुदात्तत्वे सप्तमी निर्देशोऽभ्यस्तसिज्र्थः। तास्यादिभ्यश्चानु
दात्तत्वे सप्तमी निर्देशः कर्त्तव्यः लसार्वधातुक इति वक्तव्यं किं प्रयोजनं अभ्यस्तसिज्र्थं अभ्यस्तानामादिरुदा
त्तो भवति लसार्वधातुके सिजंतस्यादिरुदात्तो भवति लसार्वधातुके। लसार्वधातुकमित्युच्यमाने तस्यैवाद्युदात्त
त्वे सति परत्वाल्लोपे कृते उदात्तनिवृत्तिस्वरः क्रियतां लसार्वधातुकानुदात्तत्वं वेति विचारे यद्यपि परत्वाल्लसार्वधातु
कस्योदात्तमिति सूत्रार्थः स्यात्तद्वचनसामर्थ्याद्यौगपद्यस्यानभ्यास्ततिश्चत्वेबयुगपदिस्यन्न। पर्यायेणाप्रसज्येत। न चैतद
क्यतेवक्तुं लसार्वधातुकमिति सप्तम्युच्यमाने योऽद्भिमक्किविपरिणामो भविष्यतीति। यथाऽश्रुतसंबंध एव मेवास्मक्किविपरि
स्यात् लोपः इति सप्तमी ... सार्वधातुके तास्यादीनामिवानुदात्तत्वं प्राप्नोति ।। तास्यादिभ्यो ... ।।
राम॰ ८१

तास्यादिभ्य इत्येवेति। अकृतार्थाहि पंचमी। सप्तमीनिर्देशस्त्वत्र कृतार्थः। संघातः कार्यीति। तत्रश्चात्स्य सर्वस्यानुदात्तत्वे
न भाव्यं नत्वादेः परस्येति वचनादादेः तत्रोदात्तानुदात्तयोरेकविषयत्वादस्ति विरोध इति परत्वाद्विन्त्वरं बाधित्वाऽनुदा

नैषदोषः। तास्यादिभ्य इत्येषा पंचमी लसार्वधातुक इति सप्तम्याः षष्ठी प्रकल्पयिष्यति तस्मादित्युत्तरस्येति।
चित्स्वरात्तास्यादिभ्योऽनुदात्तत्वं विप्रतिषेधेन। चित्स्वरात्तास्यादिभ्योऽनुदात्तत्वं भवति विप्रतिषेधेन। चि
त्स्वरस्यावकाशः चलनः चोपनः चोपनः। तास्यादिभ्योऽनुदात्तत्वस्यावकाशः आस्ते शेते। इहोभयं प्राप्नो
ति। आसीनः शयानः। तास्यादिभ्योऽनुदात्तत्वं भवति विप्रतिषेधेन नैष युक्तो विप्रतिषेधः। किं कारणं
द्विकार्ययोगो हि विप्रतिषेधः। न चात्रैको द्विकार्ययोगः। आदेरनुदात्तत्वस्यामंतस्योदात्तत्वानावश्यं द्वि
कार्ययोग एव विप्रतिषेधः। किं तर्हि असंभवोपि। ननु चात्रास्ति संभवो यदुभयं स्यात्। आदेरनुदात्तत्वमंत
स्योदात्तत्वमिति। अस्ति च संभवो यदुभयं स्यात्। नैषोऽस्ति संभवः। आदेरनुदात्तत्वमस्याचोदात्तत्व
मिति। कथं। वक्ष्यसेतत्तस्य रवियोः संघातः कार्यी भवति॥ श्रीकृष्णः

दात्तत्वं भवतीत्यर्थः॥ श्रीरामकृष्ण ॥ ॥ ॥ ॥

भा॰ कौ॰ ६

८२ वदपतीति। सप्तमे ध्यायेंगस्ययोक्तत्तत्तस्यसुगितित्सूत्रार्थव्यवस्थापनात् तत्र स्वावयवेनव्यवधानाभावादुपदेशग्रह
णात्तुकिंसस्य धकुमात्रत्वेपि प्रवर्तते निघातः आतोडि नतुतीयादेशस्त्वाकारस्यात इति तपरकरणात्प्रभवति। स्तुवि
धोतृजनमविद्यमानवदितिपरिहारोनोक्तः। हलस्वरप्राप्तौ व्यंजनमविद्यमानवदित्येवं व्यवस्थापनात्। इतश्चेति

मुकश्चोपसंख्यानं। मुकश्चोपसंख्यानं कर्तव्यं। पचमानो यजमानः। मुकाव्यवहितत्वादुपदेशादा
त्मनेपदेशधातुकमनुदात्तत्वं न प्राप्नोति। न तु वा पमुक्। अदुपदेशग्रहणेन ग्राहिष्यते। न
सिध्यति। अंगस्य गुरुत्वं। विकरणं तथा गलोः सोसंघातभक्तः अथ केयादुपदेशग्रहणेन ग्र
हीतुं। अथ्यायमतो भक्तः स्यात्। घेतायमदुपदेशग्रहणे नवा उंगस्य। अदूक्तस्तर्हि भविष्यति। न
क्तव्यं। व्यवस्थितस्य परिहारः। इत्यश्चोपसंख्यानं कर्तव्यं। इश्यव्यवहितत्वादनुदात्तत्वं न प्राप्नोति। पचतः
। पठतः। इतश्चानेकांतत्वात्। अनेकांता अनुबंधाः। यदि अनेकांता अनुबंधा अदिप्रभृतिन्ज्होत्यादिभ्यः प्र

। इत्यत्र स्यादेरेसावकाशं वचनं पचतः स्यादेनम वर्तते। शप्यदुपदेशेहल्त्वं त्वादकारांतत्वाभावादिति वचनं इत्संज्ञका
स्तु तत्र। अनेकांता इति। यद्यपि तस्य लोप इत्येकांतपक्षः स्थापितस्तथापि पक्षांतराश्रयेणात्र परिहारस्तु
। एकांतपक्षे पुरीधांमाडे इति कृतात्वस्य निर्देशात् ज्ञापकात्कार्यार्थमनुबंधानामप्रतिबंधकत्वमनुमीयते ॥ एम०
८२

अतइति। यथा पवावशति कृते विटि घैत्युपदेशग्रहणान्निघातो भवत्येवं क्डोपेपि प्राप्नोतीति भावः। वैवात्रेति। आदेशस्यात्रा
भावरूपत्वादुपदेशात्परत्वाद्वधातुकं न भवति। न तस्या निवृत्तोस्तित्वं लिविधित्वात्। नापि प्रत्ययलक्षणं वर्णाश्रय
त्वात्। यवावर इत्यत्र तु दीधीङ्तो। काराविघात एवेति प्रवर्तते निघातः। अनुदात्तादिरुहरणाद्धेति। आक्लिष्ट एतदेवमाघ
र्थात्। विदांतेरिति। विहाधिविदिभ्यः प्रतिषेधमनाक्रियेरमुक्ताविविकरणाभ्यन्ति। सिद्धं तुपूर्वस्य कार्यात्प्रतिषेधाद्दित्सन

अतः उकृत इति। अदुपदेशादिरस्यनुदात्तत्वं प्राप्नोति। तत्रादिप्रभृतिभ्यो प्रतिषेधः स्यात्परिशाभावात्। त
त्रादिप्रभृतिभ्यो जुहोत्यादिभ्यश्च प्रतिषेधः। अनर्थकः प्रतिषेधोप्रतिषेधः। अनुदात्तत्वकस्मान्न भवति। स्या
त्परिशाभावात्। नैवात्रेस्यातिन्नेवादेशं पश्याम। अनुदात्तादि रुदुहरणाद्धा। अथ्यैवापरयमनुदात्तादि रुह
णं करोति तत्ताप्यसावाभाः। नतु कृत्वविकरणेभ्योनुदात्तत्वं भवतीति। नेत इत्स्निज्ञापकमअमर्थमेनस्या
त्विंदानेरिंदानी। पत्नीहिदिरुहरणं करोति। नहिअमविकरणादि दुर्त्ति। इति तो नुदात्तत्वे विकरणेभ्यः प्रतिषेधः २
बकृन्यः। विलुनः। लुनीतः। पुनीतः। इति। नासनुदात्तत्वप्राप्नोति। इति नोनुदात्तत्वे विकरणेभ्यः प्रतिषेधः। सर्वस्यो
परेशविशेषणत्वात्। इति। तत्रानुदात्तत्वे विकरणेभ्यः प्रतिषेधोः नर्थकः प्रतिषेधोः प्रतिषेधः। अनुदात्तत्वे वि
करणेभ्यः प्रतिषेधः। सर्वस्योपदेशविशेषणत्वात्। इति। तत्रानुदात्तत्वे विकरणेभ्यः प्रतिषेधोः नर्थकः प्रतिषे
धोः प्रतिषेधः। अनुदात्तत्वं कस्मान्न भवति। सर्वस्योपदेशाविशेषणत्वात्। सर्वमुपदेशग्रहणेन विशेषयिष्यामः
उपदेशोनुदात्तेत उपदेशोडितः उपदेशोकारांतादिति। आदेः सिचो। सिच आगुदात्तत्वे। निटः पित उपसंख्यानं। लि
कृन्नाघुदात्तत्वे। निटः पितउपसंख्यानं कर्तव्यं। मा हि कार्षीत्। आनिट इति किमर्थं। माहिलाविषात्। स्वपादिहिंसा स्वपा
दीनां वा वचनात्। अन्यस्मिन् स्वरे प्रतिषेधेन स्वपादीनां वा वचनात् अन्यस्मिन्स्वरे भवति विप्रतिषेधेन स्वपादीनां वा वच
प्रत्ययप्रतिषमाधात्। उक्तो। आदिः। अनिटः पित इति। अनिट। सिचः परः पिसस्य उदात्तो भवति यथा लन्दात्तस्तेन माहि
काषीमिति तिट। तयप्ति आद्युदात्तत्वे सवितोदात्तं भवति। अन्यथा धातुस्वरेण निसमाधुदात्तं स्यात्। माहिलाविषमिति। यथ
माघुदात्ततिङ् तयक्षेमध्योदात्तं सिचः स्वरेणांतोदात्तानां स्वपादिन्यागरणांताः स्वपादयः। स्वरेणमध्योदात्तं ॥

त्रिप्रभृतिभ्यः प्रतिषेधः इति। अनुदात्तेत्त्व...
...स्वपादयः... एकादेशस्य स्वपादिहिंसामच्यनिटि

भा॰कै॰ ६ अनुदात्तेहिस्वरघ्रादिति। पाल्यो येनुदात्तेऽस्यमाणेनित्यत्वा रन्तं गत्वा ढिकारलोपे कृते ऽचोनुदात्तत्वस्य परस्याभावाद्वा राघु
६२ ञ्जनस्यात्। बहुव्रीहिविज्ञानितु भवति। रध्यास्त्रेति। अत्रयणे दिशास्य बहिरङ्गत्वादसिद्धत्वादपि स्वरः सिध्यति। सर्वस्य सर्वे
प इडुरणादिश्वतो दात्तोनिपातितः। सर्वस्य विकारः सार्वस्तत्रानुदात्तादिलक्षणोऽञ्। अध्यास्मादिति। तस्य लुप्याघुदात्तत्वं
विधीयते। सर्वस्वरेऽनकच्कस्येति। तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति साकच्कस्याप्युदात्तत्वं प्राप्नोति वचनाभीद्धी। अ
नुदात्तेत्वस्याघुदात्तत्वं प्रतिवचनम्। भ्यादिग्रहणमिति। अनुदात्तेत्वे सतेनाद्युदात्तत्वं विधीयते। अनेन च प्रत्ययस्य सर्वस्य

अनुदात्तेत्वा अनुदात्तेत्वेवेति बहुव्रीहिनिर्देशो लोपपयणादेशार्थः। अनुदात्तेत्वेवेति बहुव्रीहिनिर्देशः कर्तव्यः। अविद्य
मानोदात्तः नुदात्तः। तत्र रति बहूपकिं प्रयोजनं लोपयणादेशार्थं लोपयणादेशयोः कृतयोः आघुदात्तत्वं यथा स्या
त्। आहिस्वरध्मतारध्मसत्रा सर्वस्य लुपि। सर्वस्वरेऽनकच्कस्येति बहुव्यारहमाभूत्। सर्वकेभीद्धीभ्यः। भ्यादि
ग्रहणं किमर्थम्। रहमाभूता रहाति। नैतदस्ति प्रयोजनम्। अभ्यस्तस्वरोऽत्र बाधको भविष्यति। अतत उभयं स्या
त्। अनवकाशाः खल्वपि विधयो बाधका भवन्ति। सावकाशश्चाभ्यस्तस्वरः। कोऽवकाशः। भिमति॥

दात्तत्वमिति विरोधाद्रस्परशीनवपाभ्यादीनामेव प्रत्ययास्तद्वे स्योदात्तत्वं भविष्यतीति प्रश्नः। रहातीमावचनम्
तेरणाविषयविभागेनत्वप्यतइति भावः। पूर्वोक्तेनाभिप्रायेण चोदक आह। अभ्यस्तस्वर इति। सिद्धान्तवाद्याह। अ
नन्तइति। विरोधात्सम्बिधा भावेपर्यायेणोभयं स्यादित्यर्थः। अथ वा सर्वेषाम भ्यस्तानामपि तेनाल मार्वधातुका सर्वे पाप॰
स्योदात्तत्वं स्यादिति प्रतिपादयितुमाह। अनवकाश इति। भिमीतइति। ङि त्वात्तत्र सार्वधातुकानुदात्तत्वे कृते। अनुदा ६३
त्तेवस्याघुदात्तत्व॥

अथ प्रत्ययग्रहणमिति। भ्यादिभ्यः परः प्रत्यय एवपित्त्वं भवतीति प्रश्नः। आटः पूर्वस्येति। आडागम स्यापिद्वेति पित्त्वमा
ट एव विधीयत इति पक्षा अपेक्षोदमुक्तं। आद्यागमीनप्रत्ययः। प्रत्ययपद्धिति। अत्र हि यः प्रत्ययात्पूर्वः स एवाट इति विशेषा
भावः। आपिवेति। पित्त्वल्लोडुत्तम स्ये च विधीयते तेन त्वाट् इत्यात्सहितो लोडुत्तमः पिद्भवति ततश्च पूर्वस्योदात्तत्वं भवते
वेत्यर्थः। आट एवेति। लोडादेशात्तपितः पूर्वश्चाड्भवति प्रत्ययात्तु पूर्वो न भवत्याट्सहितस्य प्रत्ययत्वात्। पिद्ग्रहणं इति तत

अथ प्रत्ययग्रहणं किमर्थं प्रत्ययात्पूर्वस्योदात्तत्वं यथा स्यात् आटः पूर्वस्य माभूदिति। विभरांनि। नैवे
वास्ति विशेषः प्रत्ययाद्वा पूर्वस्योदात्तत्वे सत्याटो वा। अपि च। पिद्ग्रहणः पिद्ग्रहणेन ग्राहिष्यते। इदं तर्हि
प्रयोजनं प्रत्ययात्पूर्वस्योदात्तत्वं यथा स्यात् आट एव माभूदिति। एतदपि नास्ति प्रयोजनम्। पिद्ग्रहणः पि
द्ग्रहणेन ग्राहिष्यते। एवं तर्हि सिद्धे सति यत्प्रत्ययग्रहणं करोति तज्ज्ञापयत्याचार्यः स्वरविधौ संघातः क
र्यी भवतीति। किमेतस्य ज्ञापने प्रयोजनम्॥ श्रीरामकृष्णः॥ ॥ ॥

द्वस्वाबयवेन पौर्वापर्याभावः। एवं तर्हीति। प्रत्ययग्रहणमन्तरेणाप्यपि सिद्धत्वात् पूर्वस्योदात्तत्वे सिद्धे प्रत्ययग्रहणं प्र
त्ययात्पूर्वस्याद्युदात्तत्वं यथा स्यात् संघातस्य माभूदिति सेवमर्थं संघातस्य च कार्यित्वे पर्यायेणोदात्तत्वप्रसङ्गो यदि च
स्वरविधौ संघातः कार्यी भवतीति तत्सन्निहितसर्थमिह प्रत्ययग्रहणमर्थवद्भवतीत्यर्थः॥

भा·कै·६
८७

चित्त्वाएदिति। यतो लसार्वधातुकस्य सर्वस्यानुदात्तत्वं तत्वादेः ततो विप्रतिषेध उपपद्यते। एकस्मिन्विषये प्रसंगादुदात्ता
नुदात्तयोरित्यर्थः। पूर्वग्रहणमिति। प्रत्ययेपि ती। निवर्त्यमिति प्रश्नः। स्वरविधौ सप्रम्परति। सघातस्य प्रत्ययस्य कार्ये
निवृत्यर्थं पूर्वग्रहणं स्वरविधौ तद्धि तस्य कार्यत्वं ह्यापद्यते। सर्थः। तदंतपूर्वग्रापमर्थः स्यात्। स्यादिविहितपि तस्योदात्तत्व
भवतीति। उपोत्तमंरितीति। अत्राहि रितिप्रत्यये परत उपोत्तमोदात्तप्रसंगो। दिन्नस्य यातस्यचोपोत्तमोदात्तत्वमिष्यते। व
तुर्थ्यैचेति। असर्वनामस्थानग्रहणान्तृत्वसाषष्ठ्युद्ध तुर्भ्यां हलादिरितिहलोदात्तत्वविधानाद्ध्रस्व एव भविष्यतीति भावः। भ

विष्व एत्वा स्यादिभ्योनुदात्तत्वं विप्रतिषेधेनेत्युक्तत्तदुपपन्नं भवति। अथ पूर्वग्रहणं किमर्थं। ततस्मिन्निति निर्दिष्टे प
र्वस्येति पूर्वस्य भविष्यति। एवं तर्हि सिद्धे सति यत्पूर्वग्रहणं करोति तत् ज्ञापयत्याचार्यः स्वरविधौ सप्रम्यस्तरत्तस
प्रम्यो भवतीति किमेतस्य ज्ञापने प्रयोजनं। उपोत्तमं रितीति। रिदंतस्य बहुच्पतरस्य। चुरुं तस्यापद्येत न ज्ञाप्यते। च
तुः शासीतिश्शासं तस्यापि प्राप्नोति। प्रासग्रहणसामर्थ्यात् भविष्यति। प्रत्याहितत्रैवायत्रत्यात्रूद्रिदपद्य
घप्पुत्रेघुभ्येः। चतुर्भ्य इति। अथ पिद्ग्रहणं किमर्थं। दह्म्यानृत ज्ञाप्रृति। नैतदस्ति प्रयोजनं। भवत्सेवात्र पूर्वे
णां इदं तर्हि प्रयोजनं। दरिद्रति। आकारेणाव्यवहितत्वान्न भविष्यति। लोपे कृते नास्ति व्यवधानं। स्थानिवद्भावा
द्व्यवधानमेव। प्रतिषिध्यते ऽत्र स्थानिवद्भावः। स्वरविधिं प्रति न स्थानिवद्भवतीति॥ ॥

वत्स्येवात्र पूर्वेणेति। अभ्यस्तानामादिरित्यनेन। ननु यस्वरभेदो भवति अनेन पूर्वस्य अकारस्योदात्तत्वं भवति। ततश्चो
दात्तस्वरितयोर्यणः स्वरितप्रसंगो। अभ्यस्तानामादिरित्यनेन तूदात्तत्वपरमापुदात्तं भवति। एवं तर्हि नित्यत्वात्सर्वय
णादेशे कृते नास्ति स्वरभेदः। ननु स्वरभिन्नस्य प्राप्नुवन्यणादेशोप्यनित्यः। एवं तर्हि स्पष्टोदाहरणान्तरसद्भावान्नसुष्ठ
भाष्यकारेणैतन्निरूपितं दरिद्रतीति। अत्रेकारस्योदात्तत्वमापुदात्तमेव यथा स्यादित्येवमर्थं पिद्ग्रहणमित्यर्थः। राम०
लोपे कृते इति। आभ्यस्तपोहान इति परत्वाल्लोपः॥ श्रीकृष्णगोविंदाय नमः ८७

अचः कः॥ ज्ञापते स्वयमेवेति। अंतर्भावितण्यर्थत्वात् ज्ञप्तिः कर्मकर्तृविषयः। एवं च दशाधातूनामारोचान्तर्भावितण्यर्थ
स्य सकर्मकस्य दृश्यते प्रयोगः॥ नकर्मत्यमिति। योगविभागमन्तरेणोपदेशग्रहणानुवृत्त्यैव सिद्धत्वात्। तत्रैव विभाषेति य

अचः कर्तृयकि। यकि परत उपसंख्यानं। पकि परे उपसंख्यानं कर्तव्यं। स्तीर्यते स्वयमेव। उपदेशवचनात्सि
द्धं। उपदेश इति वक्तव्यं। उपदेशवचने जनादीनां। उपदेशवचनेन जनादीनां स्वरेण न सिध्यति। ज्ञापते स्वयमे
व ज्ञापते स्वयमेव। योगविभागविभागात् सिद्धं। योगविभागः करिष्यते। अचः। ततो नाकर्तृ यकि वास्मादि दृ
दांती भवति चीयते स्वयमेव। चीयते स्वयमेव। ज्ञायते स्वयमेव। ज्ञायते स्वयमेव॥ तत उपदेशे उपदेशे वाजं
तानां कर्तृ यकि वा आदिरुदात्तो भवति। स्तीर्यते स्वयमेव। स्तीर्यते स्वयमेव। तत्र धुपदेशग्रहणं कर्तव्यं। न स्यं
तरेण उपदेशाग्रहणे योगाणां ज्ञापते। न कर्तव्यं। प्रकृतमनुवर्तते। क्व प्रकृतं। तास्यनुदात्तेत् दित् उपदेशात्र्सा
र्वधातुकमनुदात्तमह्न्विङोरिति। ननु चोक्तमुपदेशे जनादीनां स्वरेण न सिध्यतीति। नैष दोषः। नैवं विज्ञायते उप
देशवचनेन जनादीनां स्वरेण न सिध्यतीति। कथं तर्हि जनादीनामप्यात्वे उपदेशवचनं कर्तव्यमिति। ततर्हि नत्रोप
देशग्रहणं कर्तव्यं न कर्तव्यं प्रकृतमनुवर्तते। क्व प्रकृतं। अनुदात्तोपदेशवननेति तनोत्यादीनामनुनासिकलोपो

कारान्तप्रसयविषयभावउपदेशे जनादीनामात्वविधानादिहवचनात्स्यादित्यत्राहुपदेशग्रहणानुवर्तनादुपदेशे ऽदंता
स्य कर्तृयक्याद्युदात्तस्य विधानात् सर्वत्रैव विषये स्वरः सिद्धः॥ श्रीरामकृष्ण॥ ॥ ॥

भा॰कै॰
८५

यति। सेट्ग्रहणमिति। रुदहणादेव यत्स सेंग्रहणं ग्रही ष्यत इति प्रश्नः। पपक्ष्येति। यती सनेन यत्तं तस्य ग्रहणात्रत्राप्यंतोदात्तत्वं पक्षे चाद्युदात्तत्वस्य द्विः स्वरेणाम ध्योदात्तत्वं चेष्यते। इट्ग्रहणं तु परैराग मः क्रियते पेक्षितो नतरो दोदात्तत्वार्थस्याद्यथा वल लविशेत्सादेव तु णीपथ्याये णोदात्तत्वविधानेपथिथेस्यादेव तु थो भावे पि पर्यायेणोदात्तत्रयं भवत्सेव मिटु भावे पि पंक्ष्ये पसत्रस्यात। संज्ञायामुः प्रास पलक्षणो नेति। वेथवदेवावधिकेवद्धिकेस्यादेस ज्ञापामिति विहितस्यकनो लुम्लुप्यर्

यतिच। सेट्ग्रहणं किमर्थं नयतीइंतो वेस्तु च्येत। इइंतो वेत्सुच्यमाने इहापि प्रसज्येत। पपक्ष्यामेतर हित्प्रयो जनं। अच इति वक्ते नेट्। इंतर्हि प्रयोजनं। यपाष्येति। संज्ञायां किमर्थमिदमुच्यते न ज्नित्यादिर्नित्यमित्येव सि द्धं। ज्नित्री सुच्यते न चात्र ज्नितं पश्यामः। प्रत्ययलक्षणेन। न लुमता तस्मिन्निति प्रत्ययलक्षणप्रतिषेधः। आगाधिकारोऽक्तस्य सप्रतिषेधः। न लुमता गस्येति। अत उत्तरं पठति। उपमान स्याद्युदात्तवचनं ज्ञापक मनुबंधलक्षणोस्वरे प्रत्ययलक्षणप्रतिषेधस्य। उपमानस्याद्युदात्तवचनं ज्ञापकार्थं क्रियते। किं ज्ञाप्यमेतत् ज्ञापयत्याचार्यः अनुबंधलक्षणे स्वरे प्रत्ययलक्षणं न भवतीति। किमेतस्य ज्ञापने प्रयोजनं। गार्गाः वत्साः विदाः। उष्ट्रग्रीवा वामरज्जुः ञ्नितीत्याद्युदात्तत्वं न भवति। इह वा त्रय इति तद्धितस्य कितइत्यंतोदात्तत्वं न भवति।

नित्लु ङ्विधानात्। अंगाधिकार इति। सौत्रर्यः सप्रम्यइति वचनात्र लुमता तस्मिन्निति न्यासे पित्रास्ति प्रत्ययलक्षणप्रति षेध इत्यर्थः। अनुबंधलक्षण इति। अनुबंधलक्षण इति। अनुबंधमात्राश्रयस्वरविषयज्ञापकमित्यर्थः। उष्ट्रग्रीवेति। इवेप्रतिकृतावितिविहितस्य कनो ञ्जीविकार्थीवापण्य इति लुप्॥ श्रीरामकृष्णः

उ॰प्र॰
८५

पथिप्रिय इति। बहुव्रीहौ प्रकृत्या पूर्वपदमिति प्रकृतिस्वर आद्युदात्तत्वं प्राप्तो संज्ञोदात्तत्वं चेष्यते। सर्वस्तोम इति। बहुव्रीहौ प्रकृत्येत्या द्युदात्तत्वं सर्वशब्दस्येष्यते। अनुबंधलक्षणाः स्वेवेति। एवं च किं त्वरोपि प्रत्ययलक्षणेन न भवति। सित्सप्ताम त्रितस्वरस्तु भ वति। अत्र पद्मत्रे तद्भुजिन्नइत्तिष्ठको त्रिश्त्सुकुत्सेति लुक्। सर्पिरागश्च सत्र स्वमो नपुंसकादिति सोर्लुक्। माहिरात्रा मिस त्रा गातिस्याद्धिति सिचो लुक्। निष्ठाव। निष्ठायां वंय ञ्नीतिः अत्राकारतायां निष्ठेत्सास वार्त्तिकारंभः। निर्दृश इति। अनात्ता इति भाजमित्यर्थः। इह च प्राप्नोतीति। विधिः प्रतिषेधाभावात्। नचेद्दाकार इति निनाप्नोरणइद्धइत्यादौ आकारस्योदात्तत्वाभावः

यद्यनुबंधलक्षणाइत्युच्यते पथिप्रियोमथिप्रिय इति। पथिमथोः सर्वनामस्थान इत्याद्युदात्तत्वं प्राप्नोति। एवं त र्ह्याचार्यो ज्ञापयति स्वरे प्रत्ययलक्षणं न भवतीति। एवमपि सर्पिरागच्छ सप्तागच्छेत्यत्रामंत्रितस्येत्याद्युदात्त त्वं न प्राप्नोति। इह च माहिरात्रा माहिध्वा तत्राइति सिचोऽन्यतरस्यामित्येष स्वरो न प्राप्नोति। एवं तर्हि ज्ञापयत्याचा र्यः सप्तमीनिर्दिष्टे स्वरे प्रत्ययलक्षणं न भवतीति। एवमपि सर्वस्तोमः सर्वपृष्ठः सर्वस्य सुपीत्याद्युदात्तत्वं न प्रा प्नोति एवं तर्ह्यनुबंधलक्षणं स्वेवा। कथं पथिप्रियो मथिप्रियः। वक्ष्यमेवैतत्। पथिमथोः सर्वनामस्थाने लुकि लुमता लुप्ते प्रत्ययलक्षणं न भवतीति। निष्ठा च द्व्यजनात्। निष्ठायामयजिदीर्घत्वे प्रतिषेधः। निष्ठायामयजिदीर्घत्वे प्रतिषेधो वक्तव्यः। दत्तोऽप्या। सुपाऽप्या। न वाद्बहिरंगलक्षणत्वात्। न वा वक्तव्यः। किं कारणं बहिरंगलक्षणत्वात् व हिरंगा अदीर्घः। अंतरंगः स्वरः। असिद्धं बहिरंगमंतरंगे अंतरंगेण प्रतिषेधमंतरेणैवैतावद्यविकारो सिद्धः। कथं नेवं वि ज्ञायते नवेरकारांतानिष्ठेति। कायत्वं हि नचेरकार एव स्याणिष्ठेति। यद्येवं निर्देशोऽद्वेनोपपद्यते। नत्वेषा आकारस्य एव पंचमी पुक्ता। इह च प्राप्नोति। आप्नोत इति। एवं तर्हि न चेरवर्णात्स्वरात्रिष्ठेति। मेवं निर्देश उपपन्नः इत्तुप्राप्नोति आ प्नोत इति इह च न प्राप्नोति। यतः रत इति। एवं तर्हि द्विर्हितविशेषणामकारांतमहणं नचेरकारांतं निष्ठेति। ए वमपि दत्तः अत्र न प्राप्नोति। इह च प्राप्नोति आप्नोत इति। एवं तर्हि कापि विशेषणमोकारग्रहणं। नचेदकारः कार्यी भव ति। एवमपि आयुष्टः अत्र न प्राप्नोति। तस्मात्सूत्र च्यते निष्ठायामयजिदीर्घत्वे प्रतिषेधो नवा बहिरंगलक्षणत्वादिति॥

आघाष्ट इति। एकारदेशीकृते आकारः कापीत्याद्युदात्तत्वं न प्राप्नोति। तस्मात्कापि विशेषणापक्षेप्यवश्यमाश्रयितव्या बहिरंगपरिभा षेत्याह। तस्मादिति। बहिरंगलक्षणत्वादित्येतत्सूत्रं च्यते अवश्याश्रयितव्यत्वादित्यर्थः। पपरिभोबाधात्तत्रघाघष्ट इत्यत्रैकारादेश

स्ववहिरंगलक्षणत्वादसिद्धमिति भावः॥

भा॰कौ॰ ६ आशितः। शकर्मकत्वाशेः कर्तर्यप्राप्तः क्तो निपात्यते। न चाविवक्षितकर्मत्वादकर्मकत्वव्यपदेशात्कर्तरि क्तो लभ्यते। पचिरदादीनाम
पि कर्मविशेषाविवक्षायां कर्तरि क्तप्रसंगात्। तस्मादशनकर्त्रीविरैकस्मिन्नेवार्थे द्रव्यकर्मणा संबंधः सोऽकर्मको नान्यः। आङ्पू
८६

आशितः॥ ॥किं निपात्यते आशित इति कर्तरि निपातनं उपधादीर्घत्वमाद्युदात्तत्वं च। आशित इति कर्तरि निपात्यते। आशितवान् आशितः। उपधादीर्घत्वमाद्युदात्तत्वं पनि पात्यते। आद्युदात्तत्वमनिपात्यमधिकारसिद्धं। उपधादीर्घत्वमनिपात्यं। आङ्पूर्वस्य प्रयोगः॥ यद्येवमवग्रहः प्राप्नोति। न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यं यथालक्षणं पदं कर्त्तव्यं। क्तिके विभाषा। विभाषा वेणिंधान्योः। किमियं प्राप्ते विभाषा आहोस्विदप्राप्ते। कथं च प्राप्ते कथं वाप्राप्ते। यदि संज्ञायामुपमानं निष्ठाव्यञ्जनान्तादिति वनित्ये प्राप्ते आरंभः नतः प्राप्ते। अन्यथात्वप्राप्ते। वेणुरिक्षयोरप्राप्ते विभाषा प्राप्ते निसोविधिः। विणुरिवणुः। रिक्तो नाम कश्चित्॥

वस्येति। व्यथादिस्वरापवादस्त्वाद्युदात्तत्वं विधीयते॥ ॥न लक्षणेनेति। संहितेवापौरुषेयी यदा नितुपौरुषेयाणीति एम॰
भावः। क्तिके वेणुरिक्षयोरिति। संज्ञायां पूर्वविप्रतिषेधान्नित्यो विधिः प्रवर्तत इति भावः॥ श्रीरामकृष्णः ८६

उपोत्तमं रितीतीति। रक्ष्येस्वंतो वर्णो रिद्भिहोच्यते। तस्मिन्परे पूर्वमुदात्तमिति विज्ञायमाने नार्थ उपोत्तमग्रहणेनेत्यर्थः। माहिस्मरधारति धेटोदिभाषाचेरः। न्मोरिति श्रेष्ठदृशः। तत्र त्रिप्रभृतीनामभावादुपोत्तमग्रहणे न स्वना स्तीति चङ एवोदात्तत्वं भवति। एवं ग्रहणेतु क्रियमाणो चेरः एवं स्वधातोः स्यात्। चौ चोरतद्धित इति। चोय स्वरो विधीयते तत्त्वोः संबंधो भवतीति षष्ठी निर्देशः कृतः। प्रत्ययस्वरोऽत्रेति। यत्रानुदात्त प्रत्ययः सचु स्वरस्यावकाशो दधीवो दधीचेति भावः। स्थानान्तरप्राप्त इति। अपवादस्थानप्रा

उपोत्तमं रितीति। उपोत्तमग्रहणं किमर्थं। नरि तिपर्वमित्येवोच्येत। तत्रापत्यर्थः। मतोः पूर्वमात्संज्ञायां स्त्रियामित्यत्र पूर्वग्रहणं न कर्तव्यं भवति एवं तर्हि उपोत्तमग्रहणमुत्तरार्थं। चङ्यन्यतरस्यामुपोत्तममित्येव यथा हमाभरतमारिस्मरधत। अंतोवत्याः। इवत्या किमर्थमिदमुच्यते। नवत्या इत्येवोच्येत। वत्या इतीयत्युच्यमाने राजवती अत्रापि प्रसज्येत। अथावत्या उच्यमानेकस्मादेवा च न भवति। असिद्धो नलोपः। तस्यासिद्धत्वान्नोऽवतीशब्दः। कृत्तर्हि अन्वतीशब्दः। यथैव तर्हि नलोपस्यासिद्धत्वान्नावतीशब्द एवं वत्वस्यासिद्धत्वान्नावतीशब्दः। आश्रयात्सिद्धत्वं स्यात्। अंतोवत्याः॥ चौ। चौ तद्धिते। चुस्वरः अतद्धित इति वक्तव्यं। दहमाभत। दाधीचो माधूचः इति। तत्र हि कः दोषः। प्रत्ययस्वरोऽत्र बाधको भविष्यति। स्थानान्तरप्राप्तः चुस्वरः। प्रत्ययस्वरस्यापवादः अनुदात्तो सुप्पिताविति। अनुदात्तौ सुप्पिताविति तस्योदात्तनिवृत्तिस्वरः। उदात्तनिवृत्तिस्वरस्य चुस्वरः। यथैवोदात्तनिवृत्तिस्वरं बाधते एवं प्रत्ययस्वरमपि बाधेत। नात्रोदात्तनिवृत्तिस्वरः प्राप्नोति। किं कारणं न गोश्वन्साववर्णेति प्रतिषेधात्। नैष उदात्तनिवृत्तिस्वरस्य प्रतिषेधः। कस्य तर्हि तृतीयादिस्वरस्य। यत्र तर्हि तृतीयादिस्वरो नास्ति दधीयः पश्येति॥ श्रीरामकृष्णः॥

मोवत्या इत्यर्थः। तदेवापवादत्वं दर्शयति। प्रत्ययस्वरस्येति। प्रत्ययस्वरस्येवोदात्तनिवृत्तिस्वरेणाप्रत्यापत्तिः क्रियत इति प्रत्ययस्वरापवादश्चुस्वर इत्यर्थः। कृत्स्वरेणाचावतेरकार उदात्तः। न गोश्वन्निति। अञ्चतिर्धातुरेव तत्रोपात्तो नानुनादेः एजाद्यामिति प्रतिषिद्धनलोपः क्विन्नतः। तृतीयादिस्वरस्येति। न गोश्वन्नित्यत्र सविभक्तिकाच इत्यतस्तृतीयादिग्रहणमनुवर्तते। यत्र तर्हीति॥ तत्रोदात्तनिवृत्तिस्वरस्य बाधक एव चुस्वर इत्यर्थः॥ श्रीरामकृष्णः ॥ ॥ ॥ ॥

भा॰के॰६ एवंतर्हीतिानगोष्वल्पिस्तत्र विभक्तिग्रहणमिवानुवर्त्तते नत्वत्यादिग्रहणमित्यर्थः। ततश्च स्वरः प्रत्ययस्वरस्य नवाधक इति उ
८७ पसंख्यानं नाङ्ग्रप्रत्ययस्वरेणासिद्धत्वात् हृस्वनाडिति। मतुपो विभक्तित्वाभावात् प्रतिषेधाभावे हृस्वनुड्भ्यां मतुबिति मतुप
उदात्तत्वप्राप्तौ निवितत्वादिति। कुतुरनडुवेन सिम्योऽस्मतुप्प्रत्ययः। तत्र लक्षणविशेषानपेक्षं उदात्तत्वमात्रप्रतिषेधे विज्ञाय
मानउदात्तनिवृत्तिस्वरस्यात्र निषेधः प्राप्नोतीत्यर्थः। अतुधेषा इति। तदनुबंधकग्रहणे नातदनुबंधकस्येति मतुप्ग्रहणेन प

एवंतर्हि नलुप्तीत्यादिलक्षणस्य प्रतिषेधं शिष्मः किंतर्हि येनकेनचिल्लक्षणेन प्राप्तस्य विभक्तिस्वरस्य प्रतिषेधं। य
द्विभक्तिस्वरस्य प्रतिषेधः हृस्ववान्ह्रस्ववान्। अत्र न प्राप्नोति। मतुप्ग्रहणमपि प्रकृतमनुवर्त्तते। क्व प्रकृतं
स्वनुभ्यां मतुबिति। यदि तदनुवर्त्तते वित्तवान् अत्रापि प्राप्नोति। मतुप्ग्रहणमनुवर्त्तते। अतुधेषः। यदि त
र्हि मतुपो ग्रहणे प्रत्ययग्रहणं न भवतीति वित्तवानिति वक्तव्यं न प्राप्नोति। सामान्यग्रहणं वक्ष्ये। इह पुनर्विशि
ष्टस्य ग्रहणं। यत्र तर्हि विभक्तिर्नास्ति दधीचीति। परिपुनरयमुदात्तनिवृत्तिस्वरस्यापि प्रतिषेधो विज्ञा
पेत। नैवं शक्यं। इहापि प्रसज्येत। कुमारीति॥ सतिशिष्टः खल्वपि नु स्वरः। कथं। चाविसुध्यते। पत्राः सेन रू
पा। क्वचास्येतद्रूपं। यत्ता रावसर्वनामस्थानेऽभिनिर्वृत्तेनकारलोपेऽकारलोपे च तस्मात्सुप्युच्यमेचोऽत
द्धिन इति॥

लुपोग्रहणं न भवतीति वत्वविधौ तुमतोरिति सपकारानुबंधकनिर्देशात्परिभाषानुपस्थानाद्द्वयोरपि ग्रहणं। यत्र तर्हीति।
ततश्च स्थानांतरप्राप्तत्वमस्त्येव तु स्वरस्येत्यर्थः। कुमारीति। कुमारशब्दः स्वाववर्णान्त इति ईकारस्योदात्तनिवृत्तिस्वरप्रतिषे राम॰
धप्रसंगः। तस्माद्दधीचीत्यत्र स्थानांतरप्राप्त एव दुर्वार इति। चार इति चारतद्धित इति वक्तव्यमेवा सतिशिष्ट इति। इष्यते चत्र इति ८७
स्थितेऽत्रान्तरंगान्वयिविधोऽल्वहिरगो लुग्बाधते लुग्विनिजचानिपूर्वं तद्धितः पश्चात् स्वरस्य लोपः॥ श्रीकृष्ण:

समासस्याव्ययजनांते चिति। उच्चैर्हूतान्नस्त्राचस्त्राचास्नुवर्त्तनाद्व्यंजनांतस्य समासस्यांतोदात्तत्वविधानाद्धलंतस्य न
प्राप्नोतीति वचनं। हल्स्वरप्राप्ताविति। हल्स्वप्रकृतत्वाद्विद्यमानवत्त्वं विज्ञायते। स्वरप्राप्ताविति प्रकृतत्वाद्व्यंजनस्यैव
प्राप्तिः प्रसेध्यते। द्विवर्द्धमिति। उभयोऽप्युदात्तेऽव्ययस्यषष्ठ्याव गतिर्भवतीत्यर्थः॥ स्वरितत्वं न प्राप्नोतीति। हल्स्वरप्राप्त्यभावा
ङ्कारस्यावधायकत्वात्। भौरिकिविधमिति। भौरिकीणां विषयो देशः। भौरिक्याद्येषुकार्य्यादिभ्यो विधल्भक्तला

समासस्य। समासस्य समासांतोदात्तत्वे व्यंजनांतेषूपसंख्यानं। समासांतोदात्तत्वे व्यंजनांतेषूपसंख्या
नकर्त्तव्यं। राजदृषद्। राजसमित्। हलस्वरप्राप्तौ व्यंजनमविद्यमानवत्। हल्स्वरप्राप्तौ व्यं
जनमविद्यमानवद्भवतीत्येषा परिभाषा कर्त्तव्या। किमर्थमिदमुच्यते। न हल्स्वरप्राप्तावविद्यमानव
दित्येवोच्येत। स्वरप्राप्तौ व्यंजनमविद्यमानवद्भवतीति वा। द्विवर्द्धं सुवर्द्धं भवति। यदि हल्स्वरप्राप्तौ व्यंजन
मविद्यमानवद्भवतीत्युच्यते। दृषत्। उदात्तस्वरितः स्वरितत्वं न प्राप्नोति। उदात्ताच्चेत्स्वरितविधौ व्यंज
नमविद्यमानवद्भवतीत्येषा परिभाषा कर्त्तव्याऽन्यतरस्याः परिभाषायाः प्रयोजनानि। प्रयोजनं तिलादिघृता
न्नातोदात्तविधयः। तितिप्रत्ययात् सर्वमुदात्तं भवतीति इहैव स्यात् भौरिकिविधं। भौलिकिविधं। चिकीर्षको
तिहोर्षक इत्यत्र न स्यात्। जित्यादिरुदात्तो भवतीति इहैव स्यात्। आहिचुंबकायनिः। आग्निवेश्यः। गार्ग्यः कृति
रित्यत्र न स्यात्। धातोरंत उदात्तो भवतीति इहैव स्यात् ऊरोति। पचतीत्यत्र न स्यात्॥ श्रीकृष्ण:

विविधन्नमस्य सः। चिकीर्षक इति। रोफषकाकाराभ्यामांकारस्य व्यवधानात्। आहिचुंबकायनिरिति। प्राचाम
वृद्धात्फिन्वहुलमिति फिन्। आग्निवेश्य इति। गर्गादित्वाद्यञ्। गार्ग्य इति। हलादित्वाद्व्यञोऽद्रित्वाभावात्॥

भा·कै·६ कथं हीति। अनन्तधर्मत्वादुदात्तादीनाम्॥ सर्वविभक्त्यन्त इति। सर्वविभक्त्यन्तावयवत्वात्सर्वविभक्त्यन्तः। सर्वग्रहणमनेकोपलक्ष-
८८ णार्थम्। सप्तानां विभक्तीनामिहानुयोगात्। अविद्यमानादात्तमिति। अन्तरुत्वसुदायोनुदात्तात्परत इति शब्दे स्वरितः

इदं तावदयुक्तं। यदुच्यते हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवद्भवतीति। कथं हि हलो नाम स्वरप्राप्तिः स्यात्। तत्रापि
द्भवता उदात्ताच्च स्वरितविधाविति वक्तव्यं। तथा तु दात्तादेरतो दात्ताच्च यदुच्यते तद्व्यञ्जनादेर्व्यञ्जनान्तान्न प्रा-
प्नोति। यदि पुनः स्वरविधौ व्यञ्जनमविद्यमानवद्भवतीत्युच्यमाने ऽनुदात्तादेरतोदात्ताच्च यदुच्यते तत्किं।
सिद्धं भवति व्यञ्जनादेर्व्यञ्जनान्ताच्च। बाढं सिद्धं। कथं स्वरविधिरिति सर्वविभक्त्यन्तः समासः स्वरेण विधिः
स्वरविधिः स्वरस्य विधिः स्वरविधिः स्वरे विधिः स्वरतो विधिः स्वरविधिरिति। मैवं शक्यं। इह हि दोषः स्यात्। उदश्वित्वा-
न्घोषः। विद्युत्वान्वलाहक इति रुत्वमनुद्धाम तु विलोपः स्वरः प्रसज्येत। अस्तु तर्हि हल्स्वरप्राप्तौ व्यञ्जनम-
विद्यमानवद्भवतीति। ननु चोक्तं कथं हि हलो नाम स्वरप्राप्तिः स्यादिति। उच्चैरुदात्तः नीचैरनुदात्तस्तत्र षष्ठी
निर्दिष्टं तद्ग्रहणं निर्दिष्टे तस्मिन्निर्दिष्टे हलोपि स्वरप्राप्तिर्भवति। यदप्युच्यते उदात्ताच्च स्वरितविधाविति वक्त-
व्यमिति न वक्तव्यं। नेदं पारिभाषिकानुदात्तस्य ग्रहणं। किं तर्हि अन्वर्थग्रहणं अविद्यमानोदात्तमनुदात्तं भ-
वति। उदात्तात्स्वनुदात्तस्य स्वरित इति। यदप्युच्यते अनुदात्तादेरतो दात्ताच्च यदुच्यते तद्व्यञ्जनादेर्व्यञ्जनान्ताच्च
न प्राप्नोतीति। आचार्यप्रवृत्तिर्ज्ञापयति तत्र सिद्धं भवति व्यञ्जनान्तादिति यदयं नोत्तरपदेनुदात्तादावसुत्का
अपृथिवीरुद्रपूषमन्थिष्विति प्रतिषेधं शास्ति। सा तर्ह्येषा परिभाषा कर्तव्या। आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषे-
षा परिभाषेति यदयं पतोऽनावदातिनावः प्रतिषेधं शास्ति॥ ॥इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणम- लम०
सिद्धः॥ ॥इत्युपाध्यायजय्यटपुत्रकय्यटकृते भाष्यप्रदीपे षष्ठस्याध्यायस्य प्रथमे पादे षष्ठमाह्निकम्॥ पादश्च प्र- ८९

हाभाष्ये षष्ठस्याध्यायस्य प्रथमे पादे षष्ठमाह्निकं समाप्तम्

थमः पादः समाप्तः

बहुव्रीहौ प्रकृत्या पूर्वपदं किमर्थमिति। अन्तरेणापि तत्सूत्रमिष्टस्यार्थस्य सिद्धिं मत्वा प्रश्नः। समासान्तस्योदात्तविधानात्तद्व-
चनार्थमिदमित्यर्थः। सुकृदिति। शोभनं लक्षणं कृतमनेनेति सुकर्मण्यपि क्विप्। नञ्सुभ्यामिति। सिद्धे विधिरारभ्यमा-
णो नियमार्थो भवतीति न्यायात्। एवमपीति। नानास्वरप्राप्तौ समासान्तोदात्तत्वविधानान्नियमेन तद्बाधितो द्वयो-
रपि पूर्वपदोत्तरपदयोः प्रकृतिस्वरप्रसङ्गः। परस्येति। उत्तरपदस्य नियमार्थे सति प्रकृतिस्वरे पारिशेष्यात्पूर्वपदस्य प्र-
कृतिस्वरो भविष्यतीत्यर्थः। इति विधिरिति। अनुदात्तस्यादेः पूर्वपदान्तोदात्तत्वे प्राप्ते तद्बाधनार्थं नञ्सुभ्यामिति

बहुव्रीहौ प्रकृत्या पूर्वपदम्॥ किमर्थमिदमुच्यते। बहुव्रीहिस्वरं शास्ति समासान्तविधेः सुकृत्। सुदात्तकृदाचा-
र्यः समासान्तोदात्तत्वे प्राप्ते बहुव्रीहिस्वरमपवादं शास्ति तेन नदास्ति प्रयोजनं। नञ्सुभ्यां नियमार्थी तु। नञ्सुभ्यामि-
त्येतन्नियमार्थं भविष्यति। नञ्सुभ्यामेव बहुव्रीहेरन्तोदात्तो भवति नान्यस्मादिति। एवमपि कुत एतत्पूर्वपदप्रकृति-
स्वरत्वं भविष्यति न पुनः परस्येति। परस्यापि शितिशास्त्रात्। शितेर्नित्याबह्वज्झिनोपमार्थे भविष्यति शितेर्विना-
न्यतरदिति। यत्नाद्वदुच्यते नञ्सुभ्यामित्येतन्नियमार्थमिति। सिद्धे विधिर्न ज्ञो सिद्धः। उदात्तेषु सुष्ठेपरस्येतन्नियमा-
र्थं भविष्यति तदुच्यते। यदप्युच्यते परस्यापि शितिशास्त्रादिति। परस्य नियमो भवेन्न पूर्वस्येष नियमः स्यात्। शितेर्नि-
त्याबह्वज्झेनैव नान्यदिति। यद्येतर्हि पूर्वपदप्रकृतिस्वरत्वं समासान्तोदात्तत्वं वा भवेत्प्रियः वा प्रियः। अत्रापि वा-
धेन। अन्तोदात्ते वा प्रिये सिद्धं अन्तोदात्तत्वं च वा प्रिये सिद्धं। कुतः संभवात्। असति हि त्वपि संभवे बाधनं भवति। अ-
स्यात्तत्तु नियमार्थं विधिर्नियमः संभवे विधेयं बलवत्त्वात्। नञ्ग्रहणमुपलक्षणं सोरपि तत्पदविषयत्वसंभवात्। शितेर्नि-
त्याबह्वज्झे वेति शितिशिललाटादिष्वन्तरपदप्रकृतिस्वरो नियमेन निवर्तितेन नु चित्रगुप्रभृतिविदर्थः। तदेव सूत्रकृतैव्यमत्र-
न्नस्यापि तच्चप्रिय इति। बाढयोनुदात्तानीति वा शब्दा वसु अनुदात्तो नयोः प्रकृतिना समासान्तोदात्तत्वं न प्राप्नोति। अस्ति वसं-
भव इति। उदात्तानुदात्तयोर्भिन्नविषयत्वाद्विरोधाभावात्॥ श्रीरामकृष्ण॥ ॥ ॥ ॥ ॥

बहुव्रीहौ प्रकृत्या पूर्वपदम्

भा॰कौ॰६
९६

ससपीति। समासविषयत्वनिबंधनत्वात्तु बाध्यबाधकभावस्यानतुचीससपिसमासांतोदात्तत्वेप्रियशब्दः प्रसपस्वरेणांतोदात्तएव भविष्यति। नचप्रत्ययस्वरस्य बाधकः पूर्वपदप्रकृतिस्वरः। एवंतर्हुदाहरणदिक् भाष्यकारेण प्रदर्शिता इदंतदाहरणंसमपादः तिसमशब्दः सर्वानुदात्तः पादशब्दोद्व्याद्रित्वाद्धुदात्तस्तत्रपूर्वपदप्रकृतिस्वरेणसमासांतोदात्तत्वेबाधितेपादशब्दआद्युदात्तः स्यात। प्रकृताद्विधेरिति। उदात्तत्वस्यप्रसक्तस्यविधानात्स्यात्प्रकृतिभावद्वारेणानुज्ञायमानात्प्रियादेप्रकृतिस्वरोनभवतीत्यर्थः

ससपिसंभवेबाधनंभवतिघ्याद्धिन्त्राहारोभ्योरयतोंतःक्रौड्न्यायेतिससपिसंभवेदधिदानस्यतक्रदानं निवर्तकंभवति। एवमिहापिससपिसंभवेपूर्वपदप्रकृतिस्वरस्तत्समासांतोदात्तत्वंयाधिष्यते। एवंतर्हिप्रकृतो द्विधिः बहुव्रीहौप्रकृत्यापूर्वपदप्रकृतिस्वरंभवतीतिकिंचप्रकृतंउदात्तइतिवर्त्तते। एवमपिकार्यप्रियः हार्यप्रि यंइत्यत्रनप्राप्नोति॥ स्वरितिः स्युदात्तोस्ति॥ अथवास्वरितग्रहणमपिप्रकृतमनुवर्त्तते॥ क्वप्रकृतंतित्स्वरितमि ति। बहुव्रीहावित्तेसिद्धं। अंतरेणापिबहुव्रीहिग्रहणंसिद्धं। तस्पुरुषेकस्मान्नभवति। तत्पुरुषेतुल्यार्थतृतीया सप्तम्युपमानाव्ययद्वितीयाकृत्याइत्येतन्नियमार्थंभविष्यति॥ कीएमहत्सः

॥स्वरितेपीति। नचचउदात्तसंज्ञाविहितावर्णौकदेशाच्चवर्णग्रहणेनगृह्यतेएवंतर्ह्युदात्तावयवत्वात्स्वरितोप्युदात्त ग्रहणेनगृह्यतेगोराम्रुत्वन्यायश्चलक्ष्यस्पर्शनवशान्नाश्रीयते। अतएवास्मिन्पक्षेअसमाश्चस्यपक्षांतरमाहअथवेति। बहुव्रीहाविति। विनापिबहुव्रीहिग्रहणेनबहुव्रीहौपूर्वपदप्रकृतिस्वरःसिद्धइत्यर्थः॥ रा॰
९६

द्विगौतर्हीति। यद्यपिद्विगुस्तत्पुरुषस्तथापितन्नियमात्रप्रतिपादनापप्रश्नः। इष्टतश्चेति। प्रपुत्रानामन्वाख्यानात्रानिष्टार्थप्रा प्तप्रवृत्तिः। एतेषामिति। तत्पुरुषादीनामित्यर्थः। असतिबहुव्रीहिग्रहणेसमासांतोदात्तस्यपूर्वपदप्रकृतिस्वरस्यचैकविषयत्वा द्विरोधाद्वपर्यायः प्राप्नोति। चित्रगुरित्युत्पश्चेतपचाराग्निरित्यादौयस्मात्तत्पुरुषादिषुतुल्यार्थादिषुपूर्वपदप्रकृतिस्वरएव भवतिनान्यानीतिसर्वनियमः कृतोनतुप्रकृतिस्वरएवेतिनियमस्ततश्चपर्यायप्रसंगः। द्विपादिति। द्वौपादावस्यद्विपादित्या दौसमासांतोदात्तत्वपूर्वपदप्रकृतिस्वरौपर्यायेणसिद्धावितिद्वित्रिभ्यामित्यादुत्तरसूत्रंबहुव्रीहाविसंतोदात्तविकल्पोनविधेयो द्विगौतर्हिकस्मान्नभवति। इगंतेद्विगावित्येतन्नियमार्थंभविष्यति। द्वंद्वेतर्हिप्राप्नोति। एतत्स्वप्रकृतिवचनंद्वंद्वेऽकहलिष्टि त्येतन्नियमार्थंभविष्यति। भाएवमपिकुलएनतएवनियमोभविष्यति। एतेषामेवतत्पुरुषादिष्विति। नपुनरेवंनियमः स्यात्एतेषांतत्पुरुषादिष्वेवेति। इष्टतश्चावधारणंभविष्यति। एतेषांतर्हिबहुव्रीहिष्वपर्यायः प्राप्नोति। द्विपाद्विषे वितत्स्तेष्वपर्यायोनप्रकल्पते। यदयंद्वित्रिभ्यांपाद्दन्मूर्धसुबहुव्रीहौशिष्टिवतत्स्यान्नेतिसिद्धेपर्यायोपयःपर्यायें पंशास्तितज्ज्ञापयत्याचार्यः पर्यायोनभवतीति। उदात्तेज्ञापकंस्वेत। उदात्तएतत्ज्ञापकंस्यात्। स्वरितेनसमा वेशेन। स्वरितेनचसमावेशः प्राप्नोति। स्वरितेपुदात्तोऽस्ति। बहुव्रीहिस्वरश्चास्तिसमासांतविधेःसुहृत्ता॥ नतत्त्वे भ्यांनियमार्थंतुपरस्यापिनिषणस्नानात्स्वेपिविधिर्नेकोऽस्तिद्वःपरस्यानियमोभवेत। अतश्चवाप्रियेसिद्धसंभ वास्वकृतादिधेः। बहुव्रीहावित्तेसिद्धमिष्टतश्चावधारणा॥ द्वियादिष्टितस्तेष्वपर्यायोनप्रकल्पते। उदात्तेज्ञापकंवे विहितस्तुज्ञापयतिबहुव्रीहिरंतोदात्तोनभवतीतितथादिष्टिवितस्योश्चेतिज्ञापकंयेषामिहपूर्वपदप्रकृतिस्वरोनिय म्यतेतेषांसमासांतोदात्तत्वपक्षेनभवतीतिबहुव्रीहिग्रहणमस्यात्। उदात्तेज्ञापकमिति। इहोदात्तग्रहणानुवृत्त्याद नयोः पर्यायाभ्युतज्ज्ञापकात्। कार्यप्रियस्यादौतुज्ञाप्यस्वरितयोः समावेशः प्राप्नोसेवेत्यर्थः। स्वरितेपीति। ए तत्सर्वमेवव्याख्यातम्॥ ॥एमाजानामायारामजा ॥ ॥ ॥ ॥

भा॰ कै॰ ६ तत्पुरुषे कर्मधारये प्रतिषेध इति। विशेषणसमासो न प्राप्नोति तेनामेव भवत्यपि तद्द्वितीयाद्यं तानामप्यौ तिसाद गतस्तेणो कृ इति
६० । विभक्ति विशेषमनुपादाय सामान्यलक्षणेनायं समासो विहित इत्यर्थः ॥ नञ्कुनिपाताना नामिति। निपातग्रहणं खिसिद्धे नञ्ग्र
हणं विस्पष्टार्थं। अकारणोऽरिस्तादौ कृत्स्वरादिबाधनार्थं तेन मन्त्रोपपदं कृतिनञ्तत्स्वरस्वर एव नञीयावान् भवति। सह निर्दि

तत्पुरुषे। तत्पुरुषे विभक्तिप्रकृतिस्वरत्वे कर्मधारये प्रतिषेधः। तत्पुरुषे विभक्तिप्रकृतिस्वरत्वे कर्मधारये प्रतिषेधो वक्तव्यः। परमं कारकं। परमेण कारकेण। परमे कारके परमकारके इति। सिद्धं तु लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणात्। सिद्धमेतत्। कथं। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति प्रतिपदं यो द्वितीया सप्तमी तृतीया समासस्तस्य ग्रहणं। लक्षणोक्तश्चायं। अव्यये परिगणनं कर्तव्यं। अव्यये नञ्कुनिपातानां। अव्यये नञ्कुनिपातानामिति वक्तव्यं। नञ्। अब्राह्मणः। अवृषलः। नञ्। कु। कुब्राह्मणः। कुवृषलः। कु। निपातानां। निष्कौशाम्बिः। निर्वाराणसिः। क्त्वा। भुक्त्वा। स्नात्वाकालकः। पीत्वास्थिरकः। क्त्वायां वा प्रतिषेधः। क्त्वायां वा प्रतिषेधो वक्तव्यः। स्नात्वाकालकः। पीत्वास्थिरकः। उभयं न वक्तव्यं। निपातनात् सिद्धं। किं निपातनं। अवश्यमत्र समासार्थं ल्यबभावार्थं च निपातनं कर्तव्यं॥

ष्टस्य च नञ्स्वर एव तीयावान् भवतीति न कर्तव्यं भवति। क्त्वायां वेति। परिगणनं वा कर्तव्यं क्त्वायां प्रतिषेधो वा वक्तव्य इत्यर्थः। ननु भिन्नफलत्वाद्विकल्पो ऽनुपपन्नः परिगणने सति साक्षात्कृतस्य यौतमित्यादिषु प्रकृतिस्वराभावः। क्त्वायां प्रतिषेधे
तु प्रकृतिस्वरप्रसंग इति चिसमे नत। अवश्यमत्रेति। अनेकप्रयोजनसंपत्तिर्निपातनाद् भवतीत्यर्थः ॥ रामः
६०

[illegible]
एतदपीति। अप्यह काराएवारं ततया कस्मात्राक्रियते नेन हल्। सत्युदाय परत्वादुपदेशस्यमास्ति हकारस्याकारोपदेश
त्वात् तथा हि हन्तीति कारान्तो व्यवसित उपदेशे हकारस्तु कल्पितो कारान्तत्वेनति नासाविह गृह्यत इत्यर्थेनेति। प्रशश इत्येवा
नुसोर्थस्याणोपाद्दानाप्याभिरं प्रतिपद्यते। यथा दवाये सत्रेण धातुस्तत्र श्चैक इति निअपरिदृश्यते। अनर्थकस्य तु भेद
निबधनाभावाद्यु परे शिवद्भावाभावः। माहिधुस्तानामित्रि लोपे कृते काराद् उपदेशात्परं लसार्वधातुकं न भवतीति
त्वस्यानुदात्तत्वाप्रसंगः। उपदेशोपरकारान्तमित्यत्र तु पस्येव तस्योपदेशः कारान्तत्वाकृतेः पिलोप एकदेशविकृतस्या
नन्यत्वादपि हि अपदेशिवद्भावेनाकारान्तमवस्तुपदेशे अर्थवता पदेशिवद्भावः। यदि तर्हि अकारान्तं यदुपदेश इ
ति विज्ञायते माहि धुस्तातामाहिधुस्तायामत्रापि प्राप्नोति। अस्त्वनुदात्तत्वे कृते लोपे। उदात्तनिवृत्तिस्वरेणासि
द्धान सिद्धमिति। इदमिह संप्रधार्यमनुदात्तत्वं क्रियतां लोप इति किमत्र कर्तव्यं परत्वाल्लोपः। एवं तर्हि इमप
लसार्वधातुकानुदात्तत्वं प्रत्ययस्वरस्यापवादः। न चापवादविषय उत्सर्गो ऽभिनिविशते पश्चादुत्सर्गाः। प्रक
ल्प्यवापवादविषयं तत उत्सर्गो ऽभिनिविशते। तन्नात्रातावत्करादिलस्य यस्वर एव भवति अपवादविषयलसा
र्वधातुकानुदात्तत्वं प्रतीक्षते। तत्रानुदात्तत्वं क्रियतां लोप इति। किमत्र कर्तव्यं। परत्वाल्लोपः। यद्यपि इ
लाल्लोपः सोऽसावविधमोनीदात्ते उदात्तो लुप्यते। तास्यादिभ्योऽनुदात्तत्वे सप्तमी निर्देशो ऽप्यत्तत्सिद्धयेत
स्यादिभ्य अनुदात्तत्वे सप्तमीनिर्देशः कर्तव्यः लसार्वधातुक इति वक्तव्यं। किं प्रयोजनं अभ्यस्तसिद्ध्यर्थं। अभ्यस्ता
नामादिरुदात्तो भवति लसार्वधातुके सिद्धं तस्यादिरुदात्तो भवति लसार्वधातुके। लसार्वधातुकमित्युच्यमाने
तस्यैव घुदात्तत्वं स्यात्। सप्तमी सप्तमी लसार्वधातुके तास्यादानामेवानुदात्तत्वं प्राप्नोति ॥ ॥
तस्य त्वान्ते उत्तरं लसार्वधातुकमिति स्वरप्रसंगः। तत्र तावदेत्रित्रि लसार्वधातुकस्य प्रसयाद्युदात्तत्वं न प्रवर्तते इत्यि
र्थः। सोसावेति। परत्वाल्लोपे कृते उदात्तनिवृत्तिस्वरः क्रियतां लसार्वधातुकानुदात्तत्वं वेति विचारे यद्यपि परत्वाल्लसार्व
धातुकानुदात्तत्वं भवति तथापि पुनः प्रसंगविज्ञानादुदात्तनिवृत्तिस्वर एव भवति। तस्यैव घुदात्तत्वं स्यादिति। असति सप्त
[illegible]
[illegible]
[illegible]

मा० कै० ६
६१

तेनैवेति। अंतोदात्तानां पाठे नेत्यर्थः। सदृशग्रहणमविरविकन्यायेनेति। अविरविकइति समुदायैकदेशानुकरणमिति सूत्वा भाष्योपात्त वः। अनेनैनेत दर्शयति अवेर्मांसमिति प्राप्नोतितद्धितोऽनभिधानान्न भवतिकिंपुनः पित्रासदृश इत्यत्र विहितस्तृतीयासमासोऽभ विष्यति। मोजनेन सदृश इति। हेतौ विति भोजनादि स्यतृतीयात्रष्यभावात्स्वर्गी समासाभावः। दास्याः सदृश इति षष्ठ्या अन्ते

तेनैव यत्नेन षष्ठीसमासो भविष्यति। सदृश। सदृशग्रहणमनर्थकं तृतीयासमासवचनात्। सदृशग्रहणमनर्थकं किं कारणं तृतीयासमासवचनात्। सदृशशब्देन तृतीयासमासउक्ते तत्र तृतीयापूर्वपदप्रकृतिस्वरं भवतीत्येव सिद्धं। षष्ठ्यर्थं तर्हि इदं वक्तव्यं पितुः सदृशः पितृसदृश इति। षष्ठ्यर्थमिति चेत्तृतीयासमासवचनानर्थक्यं। षष्ठ्यर्थमिति चेत्तृतीया समासवचनमनर्थकं स्यात्। किं कारणं। इहाप्यभिप्रेतं स्यात् पित्रा सदृशः पितुः सदृशः पितृसदृश इति। तत्र द्वयोः समानार्थयोरेकेन विग्रहः अपरेण समासो भविष्यति। अपरेण समासो भविष्यति। अविरविकन्यायेन। तद्यथा अवेर्मांसमिति विग्रह आविकशब्देन समासो भवति आविकमिति। एवं पितुः सदृश इति विग्रहो पितृसदृश इति भविष्यति। पित्रा सदृश इति विग्रहस्य वाक्यमेव भविष्यति। अवश्यं तृतीयासमासो वक्तव्यः यत्र षष्ठ्यर्थो नास्ति नरर्थो भोजनेन सदृशः अ ध्ययनेन सदृश इति। यदि तर्हि तस्य निबंधनामस्ति तदेव वक्तव्यं। इदं न वक्तव्यं। इदमप्यवश्यं वक्तव्यं यत्र षष्ठी अप तेन दृष्टं दास्याः सदृशः वृषल्याः सदृश इति। गुणात्। एतत् प्रकृतिस्वरत्वेऽयथायोः रूपसंस्थानं। एतत् प्रकृतिस्वरत्वे यगुणोपात्तरूपसंस्थानं कर्तुं संपचारत्वे दशारत्नः पंचारत्नयः दशारत्नयः। परगुणयोः कृतयोरिति तेद्धिगु विशेषत्वेन प्राप्नोति। न वा वहिरंगलक्षणत्वात्। न वा वक्तव्यं किं कारणं वहिरंगलक्षणत्वात् वहिरंगो यस्य गुणो अंतरं गइत्यलकुत्राय परिणाहस्यवौरिविभक्ते रूपसन्नत्यमगाइगं नाय एगुणावेति। पदस्यस्वरविधानस्य पुस्वं निरसवाघ एागुणयोः कृतयोरिति तद्व्याभावात्प्रकृतिस्वरेण प्रोमोनीतिवुनमपचारत्वइति पंचारत्नयः प्रमाणाभावामितित द्विगुः प्रमाणोलोद्विगोर्नित्यमिति मात्रवोलुक्। न स ज्ञ अस्ति चेति गुणाञ्जशरीपुः श्चे वावचनमिति वचनात्र भवति तयो मणारिशाः नवेति। ग्रहणस्य परिमाणार्थत्वान्मात्रक लुकुस्नेः स्रिगे भवन्नेतं एगोः सं वपनेय एगुणेनु स्तुवपे स्तत्वात्त्व

हिंगलक्षणत्वात्स्वरेकैर्नीकासिद्धाभिरूपर्यः ॥ रागः कासिद्धवहिरंगमनरंग ॥

राम० ६२

परिप्रापरिप्रसुपायेभ्य इति। सर्वनिर्देशोऽप्यपपरी एवगत्येते। तयोरेववर्जनविषयत्वं संभवाद्भाषाद्दृस्य वर्ज्यमानार्थत्वं संभ वात्प्रवहणइति। तत्पुरुषः। यन्नस्य इस्तत्पुरुषे क्रमापिसपाप्राप्यम्यात् बहुव्रीहितत्पुरुष पूर्वपदे प्रकृतिस्वरस्यापवादं मत्वा विप्र तिषेधोपन्यासः। अनेन तु सूत्रेण परिशिष्यानुदपीभावे स्वरविधिः परिवनमिति। वनं वर्जयित्वेत्यर्थः। अपपरिवहिरंचवः पंचम्यंसव्यय भावः। तयथैवेति। वाध्यसमुदायापेक्षाया विशेषाभावात्त्वस्य प्रकृतिस्वरस्यासौ वाधकः। आवतीति। अ

परिप्रेति। परिप्रत्युपापेभ्यो वनं समासे विप्रतिषेधेन। परिप्रत्युपापेभ्यो वनं समासस्येति द्भवति विप्रतिषेधे न। परिप्रत्युपावर्णमाना हो रात्रावयवेभ्योऽन्यस्यावकाशः परित्रिगर्तं परिसोवीरं। वनं समासद्वन्द्वस्यावकाशः प्र वणे प्रष्टमाः इहोभयं प्राप्नोति। परिवनं अपवनं वनं समासष्टसेनद्भवति विप्रतिषेधेन। नचावनस्यान्तोदात्तत्ववचन तरपवादत्वं निहत्यर्थे। नचात्र्योविप्रतिषेधेन। किं कारणं वनस्यान्तोदात्तवचनं तदपवादत्वं निहत्यर्थं। सिद्धमत्रांतोदा त्तत्वमुत्सर्गेणैवातस्य पुनर्वचन एतत्प्रयोजनं येऽस्यैतदपवादाः प्राप्नुवंति तद्बाधनार्थं। स यथैवतदपवादत्रप्र पदं बाधत एवमिममपि वाधिष्यते। आचार्योपसर्जना। आचार्योपसर्जनेत्येकस्यापि पूर्वपदत्वात्संदेहः। आ चार्योपसर्जनेऽनेकस्यापि परस्य पूर्वपदत्वात्संदेहो भवति। आपिशलपाणिनीयव्याडीयगौतमीयाः। एकं प रवर्जयित्वा सर्वाणि पूर्वपदानि। तत्र न ज्ञायते कस्य पूर्वपदस्य स्वरेण भवितव्यमिति। लोकविज्ञानात्सिद्धं न षष्ठ्या नेकस्यापीति। द्वयोर्द्वंद्वः स्यचरितार्थत्वान्न बहूनां द्वंद्वे संदेहाद्प्रतिपत्तिः पर्यायो वा प्राप्नोति। लोकविज्ञानादिति। आद्यस्पदि त्यस्याव्यभिचारि पूर्वपदत्वं मध्यमस्य तु पराणि पेक्ष्यापूर्वपदत्वं पदार्थापेक्षया तु न पूर्वपदत्वमिति तस्याग्रहणं ॥ श्रीरामकृष्णः गोविं

...पूर्वमानत्वेनपि द्विः प्रतिपदं ॥

ना॰ कै॰ ६
६२
सर्वपूर्व इति। सर्वेषां पूर्वः सर्वपूर्वः। पवावपूर्वि संबंधे षष्ठीविधाय समासो विधेयः। महान् व्रीह्यपराह्णादिसमास इति लक्षणप्रति
पदोक्तपरिभाषया क्रान्तेन प्रतिपदोक्तोपः कर्मधारयस्तस्य ग्रहणमित्यर्थः। कुरू॥ दासीभारादीनामिति वक्तव्यमिति। दा
सीभाराणामिति बहुवचनं द्वंद्वसमासार्थोऽयं मत्वा वचनं विभक्त्यलोपस्तु सौत्रत्वात् ईशास्यस्मात् योगविभाग इति।

सर्वपूर्वः समानीयन्ते एवमिहापि यत्सर्वपूर्वं पदं तस्य प्रकृतिस्वरत्वं भविष्यति। महान्व्रीह्य। किमर्थं
महतः प्रवृद्धशब्द उत्तरपदे पूर्वपदप्रकृतिस्वरत्वमुच्यते न कर्मधारये नित्येसेव सिद्धं न सिद्धमिति किं कार
णं श्रेण्यादिसमासे स्येवं तत्र हमाभूत् महानिरष्टो रश्मिणरीपते॥ कुरुगार्हपत वृद्ध्वस्योगार्हपते। कुरुवृ
ज्योगार्हपतमिति वक्तव्यं। कुरूणां गार्हपतं वृजिगार्हपतं। कुरुगार्हपतादिकाण्वसत्तजा सस्थीलिद्दरूपाया
रेषउवानैतिलकाद्यः एयपर्कवलो दासीभारादीनामिति वक्तव्यं। इहापि यथा स्यात् देवहूतिः देवनीतिः व
सुनीतिः वसुनीतिः वेदनीतिः ओषधीचंद्रमानः नर्हि वक्तव्यं न वक्तव्यं योगविभागः करिष्यते। कुरुगा
र्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूः पण्यकंबल इति। ततः दासीभाराणां
चेति। तत्र बहुवचननिर्देशात् दासीभारादीनां चेति विज्ञास्यते। पण्यकंबलः संज्ञायां। पण्यकंबलः संज्ञा॥

नायं द्वंद्वः। किं तर्हि असमस्तान्येव पदानि निर्दिष्टानि तथा चतैतिलकद्रूः पण्यकंबल इति विभक्ति रुद्धा दिनात्रदा
सीभारशब्दसहचरितेषु तद्रूपारोपेण बहुवचननिर्देशः। एवं च गणपाठः संगृहीतो भवति। पण्यकंबलः ॥ ॥ राम॰
६२

संज्ञायामिति॥ कृत्सप्रत्ययांतत्वात् पूर्वपदप्रकृतिस्वरो सिद्धे नियमार्थं वचनं संज्ञायामेव पण्यकंबलः प्रकृतिस्वरपूर्वपदो
भवति नान्यत्रेति। तत्र निपातप्रमाणो नियतमल्पो व्यावहारिको पः कंबलस्तस्य पण्यकंबल इति संज्ञेत्याहुः॥ अपर आह
नि। कंबल एवात्र परिपण्यएव पणः प्रकृतिस्वरो यथास्याद्यत्र माभूदिति नियमः। पण्यावधि। पण्ययोगेति विशेष
णसमासः गोरतद्धितलुकीति टच्समासांतः अत्र तु चित्वादेवान्तोदात्तत्वसिद्धमिति द्वितीयमुदाहरणमुक्तं पण्यहस्ती
ति। कृत्यतुल्याख्या अजात्येति णतत्पुरुषः क्रियावाचिनो विशेषणविशेष्यभावस्यानियमात्स्वरनिपातानियमप्रसं
गः कृत्यात् स्वपूर्वनिपातार्थं वचनं तुल्यजातिप्रतिषेधार्थमजात्येति तु वचनं न्यायसिद्धार्थानुवाद एवेति भाष्यकारमता
नुसारिणा आहुः तत्स्वरूपेतु स्यार्थस्त्रप्रतिपदोक्तपरिभाषाकत्वेषु पदानां प्रायेण तदा नियमार्थं वमुच्यते नरा आय
संज्ञायामिति वक्तव्यं योहि पणितव्यः कंबलः पण्यकंबलएवासौ स्यात्। अपर अपर आह। पण्यकंबलएव य
था स्यात्। कुमारस्तु पण्यगवः पण्यहस्ती॥ अहीने। अहीन इति किमर्थं। कांतारातीतः योजनातीतः। अहीने
द्वितीयानुपसर्गे। अहीने द्वितीयानुपसर्ग इति वक्तव्यं। इह माभूत्। सुखप्राप्तः सुखप्राप्तः दुःखप्राप्तो दुःखप्रा
प्त इति। तन्नहि वक्तव्यं यत्पुनरुच्यते अपवैतस्यहीनग्रहणं न करिष्यते। इहापि कांतारातीतो योजना
तीत इति अनुपसर्ग इत्येव सिद्धं॥

णोनुविध्यर्थत्वान्नियमानुपपत्तिर्नीवि पण्यगवस्तावदप्रकृतिस्वरप्रसंगः॥ अहीने। थाथादिस्वर एव वाऽयं योगः। अ
हीन इति किमर्थमिति। प्रत्याख्यानाय प्रश्नः। कांतारातीत इति। कांतारं स्वकृतानि सर्वे द्वितीयाश्रितेति समासो हीन
वाचस्त्र द्वितीयांतमिति थाथादिस्वरो भवति। सुखप्राप्त इति। अत्रापि थाथादिस्वरः। अनुपसर्गग्रहणं चेह क्रिय
माणे प्रवृद्धादिषु खट्वारूढशब्देन पठितव्यः आरूढशब्दस्य सोपसर्गत्वादित्वस्वाराभावे थाथादिस्वरेणान्तोदात्तत्व
स्य सिद्धत्वात्॥ श्रीरामकृष्णः गोविंद ॥ ॥ ॥

मा॰कौ॰ ६३ गति। अनंतर इति किमर्थमिति। किं व्यवहितगतिनिवृत्त्यर्थमथानंतरस्यैव पूर्वपदस्य विधानात् थाथादिस्वरबाधनार्थं प्रकृ
